# શ્રીશારદાદશકમ્

Shri Sharada Dashakam

sanskritdocuments.org

November 10, 2018

# Shri Sharada Dashakam

# શ્રીશારદાદશકમ્

## Sanskrit Document Information

Text title : shAradAdashakam

File name : shAradAdashakam.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI, dashakam

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીશારદાદશકમ્

(શ્રીકાલટિક્ષેત્રે)

કરવાણિ વાણિ કિં વા જગતિ પ્રચયાય ધર્મમાર્ગસ્ય ।
કથયાશુ તત્કરોમ્યહમહર્નિશં તત્ર મા કૃથા વિશયમ્ ॥ ૧॥

ગણનાં વિધાય મત્કૃતપાપાનાં કિં ધૃતાક્ષમાલિકયા ।
તાન્તાધ્યાપ્યસમાપ્તેર્નિશ્ચલતાં પાણિપઙ્કજે ધત્સે ॥ ૨॥

વિવિધાશયા મદીયં નિકટં દૂરાજ્જનાઃ સમાયાન્તિ ।
તેષાં તસ્યાઃ કથમિવ પૂરણમહમમ્બ સત્વરં કુર્યામ્ ॥ ૩॥

ગતિજિતમરાલગર્વાં મતિદાનધુરન્ધરાં પ્રણમ્રેભ્યઃ ।
યતિનાથસેવિતપદામતિભક્ત્યા નૌમિ શારદાં સદયામ્ ॥ ૪॥

જગદમ્બાં નગતનુજાધવસહજાં જાતરૂપતનુવલ્લીમ્ ।
નીલેન્દીવરનયનાં બાલેન્દુકચાં નમામિ વિધિજાયામ્ ॥ ૫॥

ભારો ભારતિ ન સ્યાદ્વસુધાયાસ્તદ્વદમ્બ કુરુ શીઘ્રમ્ ।
નાસ્તિકતાનાસ્તિકતાકરણાત્કારુણ્યદુગ્ધવારાશે ॥ ૬॥

નિકટેવસન્તમનિશં પક્ષિણમપિ પાલયામિ કરતોઽહમ્ ।
કિમુ ભક્તિયુક્તલોકાનિતિ બોધાર્થં કરે શુકં ધત્સે ॥ ૭॥

શૃઙ્ગાદ્રિસ્થિતજનતામનેકરોગૈરુપદ્રુતાં વાણિ ।
વિનિવાર્ય સકલરોગાન્પાલય કરુણાર્દ્રદૃષ્ટિપાતેન ॥ ૮॥

મદ્વિરહાદતિભીતાન્મદેકશરણાનતીવ દુઃખાર્તાન્ ।
મયિ યદિ કરુણા તવ ભો પાલય શૃઙ્ગાદ્રિવાસિનો લોકાન્ ॥ ૯॥

સદનમહેતુકૃપાયા રદનવિનિર્ધૂતકુન્દગર્વાલિમ્ ।
મદનાન્તકસહજાતાં સરસિજભવભામિનીં હૃદા કલયે ॥ ૧૦॥ var મદનરિપુસહોત્થાં

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-

ભારતીસ્વામિભિઃ વિરચિતં શ્રીશારદાદશકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Sharada Dashakam*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*